नं नं. १२०

आह्निक

५ पद्धति

संस्कृत

॥ दीक्षापद्धति ५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

अथ जातकर्म्म। पुत्रे जाते षष्ठादिवसादेकाविंशतिदिनस्य मध्ये यस्मिन् कस्मिन् दिने जातकर्म्म करणीयम्। यथोक्तसमये उपासना-
मण्डपस्य वेद्याः सम्मुखभागे कर्त्तरि स्वयमुपविष्टे आचार्यः साधारणब्रह्मोपासनां समाप्य प्रकृतकर्म्मारभेत्। यथा व्याख्यानं (२)
ओं य एष सुप्तेषु जागर्त्ति कामं कामं निर्म्मिमाणः। तदेव शुक्रं तद्ब्रह्म तदेवामृतमश्नुते। तस्मिन् लोकाः श्रिताः सर्वे तदुनात्ये-
ति कश्चन। यदा सर्व्वे प्राणिनः निद्रया अभिभूता भवन्ति, तदा यः शुक्र स एव ब्रह्म स एवामृतस्वरूपेण कथितो भवति,
तस्मिन् सकलाः लोकाः समाश्रिता भवन्ति तदपि स्वप्ने स जाग्रत् स्थित्वा तान् रक्षति। यदा कुक्षिमध्ये जरायुपरिवृतोऽयं
नवकुमारः संज्ञाशून्यप्रायः आसीत्, यदा तस्मिन्नेव गर्भाशये घोरनिद्रया अभिभूत आसीच्च, तदा तत्रान्धकारे तं कोऽरक्षीत्? स
स एव मङ्गलमयः पुरुषः यमाश्रित्य जीवा जीवन्ति (कन्या चेत् नवकुमार इत्यत्र नवकुमारी इति वदेत्) यस्मिन् समये अयं
कुमारः पृथिव्यामवततार, तदा कुतः स्नेह आगत्य अस्य पितुर्मातुश्च मनसि आविरासीत्? तस्मात् प्रेममयात् पुरु-
षादेव, यमाश्रित्य सर्वे जीवा जीवन्ति। ईश्वरो यथा एनं शिशुं जरायुमध्ये निर्विघ्नमरक्षीत्, भूमिष्ठेऽपि स यथा रक्षति;
तथा चिरकालं स एनमात्मक्रोडस्थं कृत्वा रक्षिष्यति। यौवनदशायां स एनं आशिषं दृढिष्ठं वलिष्ठञ्च करिष्यति, पापतापा-

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2) भ्यां निर्म्मीच्य स्वयमस्मात्मनि आविर्भाविष्यति। तस्य प्रीतिः सर्वस्मिन्नेव काले जागर्त्ति, वयं ज्ञातुं समर्था न वा, स तु सर्वान् स्वसमी—
पमाकर्षति। "ओं एकमेवाद्वितीयं." ॥ स्तोत्रं यथा। भोः करुणानिधान विश्वविधातः विधातपुरुष! वयं यदा यद्रूपेणावस्थिताः
स्वच्छन्देन जीवामः, त्वमस्मान् तदा तद्रूपेण रचित्वा स्वकीयापारकरुणां विस्तारयसि। त्वं समग्रविश्वव्यापारान् अस्मा-
दृं कमवस्थानुरूपिणः कृत्वा जीवानां कल्याणं वर्द्धयसि। त्वं जरायुपरिवृतं गर्भं सद्योजातं शिशुञ्च यथा यत्नेन रक्षसि तस्य कु-
त्रापि तुलना नास्ति। यस्मिन् अन्नमये कुक्षौ लवमात्रस्य पदार्थस्य अवकाशाभावो दृश्यते, तत्रापि त्वं गर्भस्थं बालकं तत्र
३ संस्थापयित्वा रक्षसि। त्वं तत्र तिष्ठन्निव स्वपाणिना तस्य मुखपद्मे मुखे शोभा विदधासि. एवं तस्य भाविप्रयोजनसाधनान् चक्षु-
रादीन्द्रियान् सर्व्वान् निपुणं रचयसि। पुनः स यदा भुवनाद्भुवनान्तरं गच्छन्निव निर्व्वातां तिमिरपूर्णां जरायुशय्यां विहाय
आलोकव्याप्तायां वसुधायां अवतरति, तदा तव करुणा पुरोवर्त्तिनी भूत्वा प्रेम्णा समालिङ्गति तं। तस्मिन्नेव क्षणे तव प्रेमा पितुर्मातुश्च
मनसि स्नेहरूपेणाविर्भवति एवं बन्धूनामानन्दकोलाहलस्य मध्ये तौ प्रेमार्द्रौ भूत्वा पुत्रस्य मुखचन्द्रमसं पश्यतः। भो जगदीश्वर! वयं
तव महिमानं कियन्तमिव कीर्त्तयामः। यस्मात् त्वं संकीर्णगर्भाशये जरायौ सर्व्वावयवसम्पन्नं मनुजबालकं रक्षसि. अपि च तस्य प्राण-

रक्षणाय गर्भिण्या उदरादेव तस्य भोजनं पानञ्च विदधासि एवमवशेषे धात्री भूत्वा तस्याः प्रसूतिक्रियां विदधासि; तस्मात् कुमारे (३)
भूमिष्ठे यत् तस्य पालनं पोषणञ्च विधास्यसि इत्यत्र किं चित्रं? त्वमस्मान् कस्यामप्यवस्थायां न विस्मरसि। हे परमात्मन् वयमद्य नव-
कुमारस्य अस्य जातकर्म्माणि तव करुणामिच्छन्त्यः श्रद्धया प्रीत्या च त्वां नमस्कुर्मः। त्वमस्माकं विशुद्धां प्रीतिं गृहाण। "ओं एकमेवाद्वि-
तीयं"। "ओं य एकोऽवर्णो बहुधा शक्तियोगात् वर्णाननेकान् निहितार्थो दधाति। विचैति चान्ते विश्वमादौ स देवः स नो बु-
द्ध्या शुभया संयुनक्तु॥" यः अद्वितीयः वर्णविहीनश्च, यः प्रजानां प्रयोजनमधिगम्य विविधशक्तियोगेन अनेकानि काम्यानि वस्तू-
नि विदधाति; एतत् ब्रह्माण्डं आदौ मध्ये अन्ते च येन व्याप्तमस्ति, स ज्योतिर्मान् परमेश्वरः सोऽस्माकं शुभां बुद्धिं प्रेरयतु॥ "ओं
एकमेवाद्वितीयं"॥ अथ नवकुमारस्य वासभवने पितुः प्रार्थनं यथा हे सर्वलोकमहेश्वर! अखिलविधातः! त्वमस्माकं नित्यः पिता माता
च; त्वं गृहदेवता; तव प्रसादात् एष नवकुमारः गर्भसङ्कटादुत्तीर्य्य भूमिष्ठ आसीत् एवमस्मिन् सूतिकागृहे (अथवा अस्मिन् लोके) (एतानि
दिनानि यावत् तव आश्रयेण रक्षित आसीत्। अस्य कृते कृतज्ञत्वेन त्वां प्रणमामि एवमेनं तव पादकमले समर्पयामः। अयं भवतः स्नेह-
भाजनः एतादृश्यामप्यवस्थायां भवत्प्रसादेनास्य कस्याप्युपद्रवस्याभावो न विद्यते। अधुना भवानेनं यथा क्रोडे पालयसि, प

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

यस्मिन्नपि काले तथा रक्षिष्यति स्वमस्य हृदये राजमानः सन् तव सत्पथे अग्रसरं करिष्यति। ओं मनुष्याणामृषीणाञ्च भूतानां भक्तवत्सल! ईश रक्षस्व मे पुत्रं (वा पुत्रीं) सर्व्वसाक्षिन् नमोऽस्तु ते। शान्तिरस्तु शिवञ्चास्तु विनश्यन्त्वशुभानि च। सर्व्वोपद्रवशान्त्यर्थं गृहाण शरणागतं (वा शरणागतां)। ओं शान्तिः शान्तिः शान्तिः हरिः ओं"॥ अनन्तरमाचार्य्यस्य आशीर्व्वचनं यथा। यस्येच्छया एष विश्वः असर्जि, यस्य करुणामवलम्ब्य सर्व्वे जीवा जीवन्ति, यस्य स्नेहः अन्वयपरम्परया प्रवहमाणः सन् पुत्रपौत्रादीन् पालयन्ति, यः स्वभक्तानां सत्कामं पूरयति, तस्य मम एतावती प्रार्थना यत् स एनं मातृवत् सर्व्वस्मिन् काले रक्षतु। अपि च श्रिया सौन्दर्य्यैः सद्गुणैश्च विभूषयतु हे परमात्मन्! अयं बालकः (इयं बालिका वा) क्रमेण आशिष्ठो द्रढिष्ठो बलिष्ठश्च भूत्वा तव प्रीतौ निमग्नस्तिष्ठतु एवं आवज्जीवनं तव प्रीतिकरं कार्य्यं करोतु। त्वमस्य पितुर्मातुश्च मनसि धर्म्मरूपं बलं प्रेरय। एतेषां परिवारवर्गाणां हृदि समग्राः सद्भावाः स्फुरन्तु। ओं शान्तिः शान्तिः शान्तिः हरिः ओं॥ संक्षेपेणैतस्मिन् कर्म्मणि कर्त्तव्ये सति केवलं आचार्य्येण सह पिता सूतिकागृहं गत्वा पूर्व्वोक्तप्रार्थनमाशीर्व्वादञ्च कृत्वा कार्य्यं समापयेत्। यदि कुमारस्य पिता नोपतिष्ठेत् तदा पित्रा इव मात्रा प्रार्थनीयं। इति जातकर्म्म समाप्तं॥

A Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

कस्मिन्

(5) अथ नामकरणं। बालस्य षष्ठमासात् वत्सरं यावत् नामकरणस्य कालः। एतत्कालमध्ये यस्मिन् दिने पूर्वाह्णे एतदनुष्ठानं कुर्यात। अनुष्ठानदिने पित-
रि मातरि वा उपासनामण्डपस्य वेद्याः सम्मुखभागे उपविष्टे आचार्यः साधारणब्रह्मोपासनां समाप्य प्रकृतकर्म्म आरभेत्। यथा- (२)
व्याख्यानं। स नो बन्धुर्जनिता स विधाता। सोऽस्माकं बन्धुरेव पिता स विधाता। तस्मात् परमपितुः सकाशात् वयं सर्व्वानेवार्थान् लब्धव-
न्तः, प्रत्यहं येन वयं जीवामः, येन वयं सुसुखं सानन्दश्च जीवनमतिवाहयामः स एव तस्य मूलं कारणं। इह पृथिव्यां यावतान्युज्ज्वलानि सुन्द-
राणि च वस्तूनि सकलानि तस्यैवेश्वरस्य कृपया वयं उपभुञ्जामः। उषायाः सौन्दर्य्याणि सन्ध्यायाः मधुरत्वानि च, शीतकालस्य शिशिराणि
वसन्तस्य मलयानिलानि च शीतद्युतेर्ज्योत्स्नाः सूर्यस्य करणाश्च फलानि पुष्पाणि पल्लवः पक्षिणश्च विचित्रा धरित्री तथा अगाधतो-
//कायस्तथा याः सागराः अस्माकमावासस्थानं ~~कार्य्यस्य~~ इन्द्रियाणि च, जीवनं यौवनं प्रणयो बन्धुत्वश्च, बुद्धिः स्मरणं भाषणञ्च, अस्माकं मानसिकाः
समुदायाः शक्तीश्च, एतेषां वस्तूनां कृतेऽस्माकमुच्छ्वसिता कृतज्ञता सर्व्वकार्य्यनिलयं सर्व्वेश्वरं प्रति धावति। ईश्वरस्य करुणायां मनसि सं-
स्मृतायां तस्मिन्नाद्वितीये परसेत् विरुद्धं भावद्वयं पश्यामः, यथा सोऽस्य जगतः पिता माता च। पितृभावो मातृभावश्च एतदुभयौ तस्मिन्
सस्मिलितौ वर्त्तेते। पिता इव सोऽस्मान् पालयति, अस्माकमात्ममनःशरीराणि सर्व्वापद्भ्यो रक्षति, यावज्जीवनमस्मानतियत्नेन शिक्षयति
च। माता इव सोऽस्माकं सुखाय व्याकुलोऽस्ति, माता यावन्ति कौशलानि कृत्वा आत्मनः शिशोस्तुष्टिं साधयितुं तत्परा भवति, तथैवा-
स्मान् सुखीकर्त्तुं परमेश्वरस्य चेष्टते। मातुर्निश्चले प्रेम्णि मनसि उदिते अवाध्योऽसाधुपुत्त्रोऽपि स्नेहविगलितो भवत्येव, ईश्वरस्य-

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6) पि एतादृशो मातृभावः। अस्य सुकोमले वात्सल्ये स्मृतिपथं गते सति पाषाणहृदयोऽपि प्रेमार्द्रहृदयो भवति। अतिसाधारणव्यापारेऽपि
अस्माकं सुखाय ईश्वरस्य यादृशो यत्नः तन्मनसि चिन्तयित्वा मातृस्नेहमनुभविष्यसि। अस्मिन् सुकुमारे शिशौ तस्येश्वरस्य आ-
त्याश्चर्यो मातृभावो प्रकाशते। पुनः संसारस्य कठिनवाताघातात् सोऽस्य जीवनं यथा रक्षति, तेन तस्य पितृभावोऽस्माभि-
रनुभूयते। अद्य तस्य विश्वपितुरखिलमातुश्च करुणां संस्मृत्य भक्त्या वयं तं नमामः। ओं एकमेवाद्वितीयं। स्तोत्रं यथा। हे
करुणाकर विश्वविधातः विधातृपुरुषः! वयं यदा यस्यामवस्थायां स्वच्छन्देन जीवाम // त्वमस्मान् तदा तेनैव ^ रक्षित्वा स्वस्यापारकरु- रूपेण //
णां विस्मारयसि। त्वमखिलविश्वव्यापारान् अस्मदवस्थानुरूपान् कृत्वा कुशलं सम्वर्धयसि। कस्यामप्यवस्थायां त्वमस्मान् न विस्मरसि।
शैशवे यदा वयं आत्मनः पोषणरक्षणाय अक्षमाः, यदा च वयं क्षुत्पिपासाभ्यां पीडिता अपि अन्नपानादिकमाहर्तुमक्षमाः स्म, तदा
च त्वं पितुर्मातुश्च मनस्येकमात्रं स्नेहमुत्पाद्य समग्रादभावादस्मान् मोचयः। यदा वयं त्वां ज्ञातुमप्यशक्ता एवं तव सान्निध्ये प्रार्थयितुम-
प्यक्षमा तदानीमपि भवतः करुणा मनुष्येषु आविर्भूय प्रतिक्षणमस्मानरक्षीत्। वयं तव तादृशीः समस्ताः करुणाः स्मृत्वा श्रद्धया
प्रीत्या च नमस्कुर्मः। भवानस्माकं नवविश्रद्धां प्रीतिं गृह्णातु। ओं एकमेवाद्वितीयं। अनन्तरं नवकुमारं नवकुमारीं वा स्नापयि-
त्वा नववासं परिधाप्य उपासनामन्दिरे पितुर्वा मातुः सम्मुखभागे वेद्यभिमुखमुपविश्य पिता वा माता प्रार्थयेत् यथा। हे परम-

पितः! तव प्रसादेन मम एष नवकुमारः (कुमारी वा) अजायत, अपि च (एतान्) मासान् अत्यवाहयत। त्वमेवास्य पिता माता च त्वमे-
वास्य रक्षिता; अस्मिन् अन्धकारमये संसारे त्वमेवास्य एकमात्रः सहायः। प्रभो तव क्रोडे सुरक्षिते अस्य ~~आवाल्ला~~ भयतापाद-
यो न स्पास्यन्ति। पापप्रलोभनादीनं दूरे रक्षित्वा त्वमस्य जीवनं धर्म्मविभूषणैः विभूषय। क्रमवर्द्धितैः वयोभिः सह यथा-
कथञ्चिद्रूपेण अस्य आत्मा तव मङ्गलमये पथि अग्रसरो भवेत्, एवं सर्व्वस्यामप्यवस्थायामस्य लक्ष्यं त्वां प्रति सुस्थिरं स्यात्। हे
करुणात्मने! ~~हे करुणात्मन्~~! एकाग्रमनसा त्वयि निर्भरं कृत्वा अस्मिन् नवकुमारं (नवकुमारीं वा) तव पाणौ समर्पयामि, अयं
यथा तवानुगतो भूत्वा जीवनयात्रां निर्व्वहेत् भवता तथा कर्त्तव्यं। "ओं एकमेवाद्वितीयं" ॥ ततो मातरि वा पितरि नवकुमारं वा
नवकुमारीं क्रोडे गृहीत्वा वेद्याः सम्मुखे आचार्य्यस्य समीपे उत्थिते सति आचार्य्यः नामकरणं कृत्वा आशीर्व्वादं कुर्यात्। य-
था॥ श्रीयुक्तस्य अमुकस्य एतस्य नवकुमारस्य श्रीमन् अमुक (नवकुमार्य्याः श्रीमती अमुकी) इति नाम भवति। परमेश्व-
र एनं नवकुमारं श्रीमदमुकं (नवकुमारीं चेत् श्रीमदमुकीं) स्वकीये अमृतमये क्रोडे रक्षतु, अस्यात्मानं सत्ये धर्म्मे
मङ्गलमये च पथि नियुनक्तु एवमस्य नित्यां समृद्धिं विदधातु। ओं शान्तिः शान्तिः शान्तिः हरिः ओं॥
ओं य एकवर्णो बहुधा शक्तियोगात् वर्णाननेकान् निहितार्थो दधाति। विचैति चान्ते विश्वमादौ स देवः स नो बुद्ध्या शु-
नि

र्धिया संयुनक्तु"। य एक वर्णो विहीनश्च एवं प्रजानां प्रयोजनं विदित्वा एकशक्तियोगेन विविधानि वस्तूनि विदधाति अ-
(४) खण्डीयं ब्रह्माण्ड आदौ मध्ये अन्ते च येन व्याप्तोऽस्ति स दीप्यमानः परमेश्वरः; सोऽस्मभ्यं शुभां बुद्धिं प्रदद्यातु। ओं
एकमेवाद्वितीयं। ततो यथायोग्यमन्नादिकमानीय कश्चित् ज्ञाति वा बन्धुर्वा नवकुमारस्य मुखे प्रदद्यात्। इति नाम-
करणं समाप्तं॥

५ अथ चूडाकरणं। तत्र चूडाकरणात् उपनयनात् प्राक् चूडाकरणं। प्रथमं पिता वा अन्य आचार्यः प्रातःकाले उष्णजल-
समेतं कांस्यपात्रं ताम्रक्षुरश्च वेद्याः सम्मुखभागे स्थापयित्वा क्षुरहस्तं नापितं, वृषगोमयं. नापिताय दातुं धान्ययवतिल-
माषात्मकैश्चतुर्भिः पूरितं पात्रचतुष्टयश्च वेद्याः पश्चिमदक्षिणभागे स्थापयेत्। अनन्तरमाचार्यः वेद्याः सम्मुखभागे कुमार-
मातृसम्मुखमानीय उपविशेत्। तत आचार्यः प्रकृतंकर्म्म आरभेत। ओं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव
चक्षुराततं। चक्षुर्यथा आकाशे विस्तृतानि सकलानि वस्तूनि पश्यति, तथा धीरा अपि तस्य विष्णोः विश्वव्यापिनः परमात्मनः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

परमं पदं सदा पश्यन्ति । ओं यो देवोग्नौ योऽप्सु यो विश्वं भुवनमाविवेश । य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमोनमः । यः देवः वह्नौ, यः देवः
जले यश्च विश्वस्मिन् प्रविष्टोऽस्ति; यः सर्वास्वोषधीषु यश्च वनस्पतिषु च अस्ति, तं देवं पुनःपुनर्नमामः । अनन्तरमाचार्य्यैः दक्षिणपाणिना
कांस्यपात्रादुदकं गृहीत्वा कुमारस्य दक्षिणकर्णोर्द्ध्वदेशं (दक्षिणकपुष्टिका) आर्द्रीकृत्य पठेत् । ओं आपो उन्दन्तु जीवसे । जलं जीवनाय आर्द्रं
करोतु । ततो वामपाणिना दक्षिणकपुष्टिकादेशं धृत्वा दक्षिणहस्तेन तत्र ताम्रक्षुरमर्पयित्वा पठेत् ॥ ओं स्वधिते मैनं हिंसीः ॥ हे क्षुर ! ए-
नं मा हिंसिथाः । ततः केशच्छेदो यथा न भवेत् तथा कृत्वा तत्र ताम्रक्षुरं त्रिश्चालयेत् । पुनर्दक्षिणहस्तेन कांस्यपात्रस्थमुष्णोदकं गृहीत्वा कुमा-
रस्य शिखास्थानात् सम्मुखाधोभागपर्य्यन्तं (कपुच्छलं) आर्द्रं कुर्य्यात् ॥ ओं आपो उन्दन्तु जीवसे । जलं जीवनाय आर्द्रं करोतु । ततो वामहस्तेन
कपुच्छलदेशं धृत्वा दक्षिणहस्तेन तत्र ताम्रक्षुरमर्पयित्वा पठेत् ॥ ओं स्वधिते मैनं हिंसीः ॥ हे क्षुर एनं मा छिन्द्धि । अनन्तरं केशच्छेदो य-
था न स्यात् भवेत् तत्र ताम्रक्षुरं त्रिश्चालयेत् । पुनर्दक्षिणहस्तेन कांस्यपात्रस्थमुष्णोदकं गृहीत्वा कुमारस्य वामकर्णोर्द्ध्वदेशे (वामक-
पुष्टिकायां) सिञ्चेत् ॥ ओं आपो उन्दन्तु जीवसे । जलं जीवनाय आर्द्रं करोतु । अनन्तरं वामहस्तेन वामकपुष्टिकादेशं धृत्वा दक्षिणह-

Joint project of the Rajawade Sanshodhan Mandal and the Yashwantrao Chavan Pratishthan, Mumbai.

(10) स्लेन तत्र ताम्रक्षुरमर्पयेत्। ओं स्वधिते मैनं हिंसीः॥ हे क्षुर एनं मा छिन्धि। ततः केशछेदो यथा न भवेत् तथा कृत्वा तत्र स्थाने ताम्र-
क्षुरं निश्चालयेत्। अनन्तरमाचार्यः कुमारस्य शिरो दक्षिणं हस्ताभ्यां धृत्वा पठेत्। ओं त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं अगस्त्य-
स्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्ते अस्तु त्र्यायुषं॥ जमदग्नेः कश्यपस्यागस्त्यस्य देवानाञ्च यानि आयुंषि त्रीणि बाल्ययौवनस्था-
विराणि सन्ति, तानि तव सन्तु। ततः पुष्पादिभिरलङ्कृतस्य कुमारस्य नापितः मस्तकं मुण्डयेत् तांश्च केशान् वृषगोमयोपरि परिगृह्य
अरण्ये वंशवाटिकामूले वा स्थापयेत्। इति चूडाकर्म समाप्तं॥

अथ उपनयनं। तत्र प्रथमं प्रातर्भोजनोत्तरं क्षौमं काषायं वा वस्त्रं परिधाय कुण्डलादिभिरात्मानमलङ्कृत्य च वेद्याः स-
८ म्मुखभागे उपविशेत्। ततः साधारणब्रह्मौपासनां समाप्य आचार्यः तत्रोपस्थितान् ब्राह्मणान् सम्बुद्ध्य पठेत्। ओं आगन्त्रा
समगन्महि प्र सु मर्त्यं युयोतन। अरिष्टाः सञ्चरेमहि स्वस्ति सञ्चरतादयं। हे ब्राह्मणाः यूयमेनं शोभमानं मानवकं अस्मा-
भिः सह संयुक्तं कुरुत। वयमपि अनेनागमनशीलेन मानवकेन सह सहाध्यायामः अपि निर्विघ्नेन सञ्चरामः। अयमपि सक्षेमं विचरतु।
ततो मानवकः अनेन मन्त्रेण प्रार्थयेत् यथा। ओं व्रतानां व्रतपते व्रतञ्चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्या-
समिदमहमनृतात् सत्यमुपैमि॥

हे व्रतपते! अहं यद्व्रतमनुष्ठास्यामि तत्त्वां ब्रवीमि, त्वया तथा करणीयं, त्वया तथा करणीयं येनाहं तस्मिन् व्रते समर्थो भवेयं ६
अपि च त्वया व्रतरूपसमृद्ध्या अमृतात् सत्यं प्राप्नुयां। ततो मानवक आचार्यं ब्रूयात्। ओं ब्रह्मचर्यमागामुप मा नयस्व। अहं ब्रह्मचर्यं
धृतवानस्मि मामुपनीतं कुरु। अनन्तरमाचार्यः तस्य नाम पृच्छेत् यथा। ओं को नामासि। तव किं नाम?। मानवकः स्वनाम ब्रूयात्। ओं अमु-
कदेव शर्मा नामास्मि। मम नाम श्री अमुकदेव शर्मा। आचार्यः ब्रूयात्। ओं देवाय त्वा सवित्रे परिददामि श्री अमुकदेवशर्मन्
हे श्री अमुकदेवशर्मन्! जगत्प्रसवित्रे परमदेवतायै त्वां समर्पयामि। तत आचार्यः ब्रूयात्। ओं ब्रह्मचार्यसि श्री अमुकदेवशर्मन्।
हे श्री अमुकदेवशर्मन् ब्रह्मचारिन्। आचार्यः ब्रूयात्। ओं आचार्याधीनो वेदमधीष्व मा दिवा स्वाप्सीः। आचार्यस्य अधीनो भूत्वा
वेदाध्ययनं कुरु। दिवसे मा निद्रितो भव। मानवकः ब्रूयात्। ओं बाढं। तत आचार्यमानवकौ उभौ उत्तिष्ठेतां। अनन्तरमाचार्यः त्रिवृतां
मुञ्जमेखलां मानवकस्य कटिदेशे बध्नीयात् एतन्मन्त्रमप्यध्यापयेत्। ओं इयं दुरुक्तात् परिबाधमाना वर्णं पवित्रं पुनती न आगात्। एषा
मेखला अस्माकं यावन्त्ययुक्तवाक्यानि निवार्य पवित्रं वर्णं परिशोधयित्वा च आगच्छतु। अनन्तरमाचार्यः मानवकस्य हस्ते यज्ञोपवीतं दत्वा तं पा-
ठयेत्। ओं यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामि। त्वं यज्ञोपवीतः यज्ञस्य उपवीतरूपश्च त्वया उपनीतो भवामि। मानवक ए-

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

तत पठित्वा यज्ञोपवीतं परिदध्यात्। अनन्तरमुभौ उपविशेतां। आचार्य्यः ब्रह्मचारिणं ब्रूयात्। ओं अधीहि भोः सावित्रीं मे भवा-
(12) न् अनुब्रवीतु। मम सकाशात् सावित्र्याध्ययनं कुरु अस्मात् पठनात् त्वमेतत् पठ। ततो ब्रह्मचारिणि अवस्थिते आचार्य्यः प्रथमं अध्यापयेत्। ओं
तत्सवितुर्व्वरेण्यं। ततः ओं भर्गो देवस्य धीमहि। ततः ओं धियो यो नः प्रचोदयात्। ततः ओं तत्सवितुर्व्वरेण्यं भर्गो देवस्य धीमहि। ततः ओं
धियो यो नः प्रचोदयात् ओं। ततः ओं तत्सवितुर्व्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ओं। तस्य जगत्प्रसवितुर्व्वरणीयं ज्ञानं
शक्तिञ्च ध्यायेम योऽस्माकं समस्ताः बुद्धिवृत्तीः प्रेरितवान्। तत आचार्य्यः ब्रह्मचारिणा (बिल्वदण्ड) ओंकारपूर्व्वं व्याहृतित्रयं पृथक् अध्यापयेत्। प्रथमं
८ ओं भूः ततः — ओं भुवः तदनन्तरं — ओं स्वः। तत उभौ उत्थाय ब्रह्मचारिणं तत्परिमितं (बिल्वदण्डं) दत्वा तं पाठयेत्। ओं सुश्रुव सुश्रुवसं मा
कुरु। हे शोभनकीर्त्ते! त्वं कीर्त्त्या मां विख्यातं कुरु। ततो [illegible]दण्डी ब्रह्मचारी भिक्षां प्रार्थयेत। तत्र प्रथमं मातुः समीपे प्रार्थये-
त्। ओं भवति भिक्षां देहि। भिक्षायां प्राप्तायां ब्रूयात् ओं स्वस्ति। ततो मातृबन्धूनां स्त्रीगणानां समीपे (ततः पितुः समीपे) तदनन्तरमन्येषां भिक्षां प्रार्थये-
त्। पुरुषसमीपे भिक्षायान्तु ओं भवन् भिक्षां देहि इत्युक्त्वा प्रार्थयेत्। एवं कृते भिक्षालब्धवस्तूनि आचार्य्याय दद्यात्। ततो
ब्रह्मचारी सन्ध्यां यावत् वाग्यतो भूत्वा अवतिष्ठेत्, सन्ध्याकाले सम्प्राप्ते गायत्रीं जप्त्वा हविष्यान्नं भुञ्जीत। इत्युपनयनं समाप्तं॥॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

अथ समावर्त्तनं। वेदाध्ययनानन्तरं द्वादशदिनस्य मध्ये अनुगतं ब्रह्मचारिणं आचार्य्यः समावर्त्तितं कुर्य्यात्। प्रथमं ब्रह्मचारी वेद्याः सम्मुखभागे उपविशेत्। 8
ततः साधारणब्रह्मोपासनां समाप्य आचार्य्यस्तं पाठयेत्। ओं व्रतानां व्रतपते व्रतमचारिषं तत्ते प्रब्रवीमि तदशकं तेनाराधि इदमहमनृतात् सत्यमुपागां।
हे व्रतपते अहं यद्व्रतमनुष्ठितवान् तत् त्वां कथयामि, अहं तस्मिन् व्रते समर्थ आसं तेन व्रतसम्पत्त्या अनृतात् सत्यमपि प्राप्तोऽस्मि। ततः आचार्य्यस्यानुज्ञया ब्र
ह्मचारी व्रीहियवमाषमुद्गाद्यैः ओषधिभिः युक्तेन चन्दनादिवासितेन शीतोष्णाभिश्रितेन च जलेन साञ्जलिं पूरयित्वा अनेन मन्त्रेण तज्जलं भूमौ
क्षिपेत्। ओं यदपां घोरं यदपां क्रूरं यदपामशान्तं तत् सृजामि। जलीयं यद्भयावहं यत्क्रूरं यदस्वास्थ्यकरञ्च तत्सर्व्वं परित्यजामि। पुनः पूर्व्वो-
क्तेन जलेनाञ्जलिं पूरयित्वा एतन्मन्त्रेण आत्मानमभिसिञ्चेत्। ओं यशसे तेजसे ब्रह्मवर्च्चसाय बलायेन्द्रियाय वीर्य्यायान्नाद्याय रायस्पोषा-
य त्विष्यायापचित्यै। यशः तेजः ब्रह्मवर्च्चः बलं इन्द्रियाणि वीर्य्यं अन्नाद्यं धनधान्यं दीप्तिः सम्मानश्च एतेषां प्राप्त्यै अहमात्मानमभिसिञ्चा-
मि। एतद्व्यतिरिक्तश्च वारद्वयम मन्त्रकमभिसिञ्चेत्। ततः ब्रह्मचारी उत्थाय पादतलतः मेखलां परित्यजेत् एतन्मन्त्रञ्च पठेत्। उदुत्तमं वरुण-
पाशमस्मदवाधमं विमध्यमं श्रथय। हे ईश्वर मम कण्ठावस्थितं पाशं तं अवतारय, पादावस्थितं पाशमवतारय एवं कटिदेशावस्थितं पा-
शं शिथिलं कुरु। ततो ब्रह्मचारी पुरातनं यज्ञोपवीतं परित्यज्य नूतनं यज्ञोपवीतं परिधाय पठेत्। ओं यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेने-

हा

त्रीमि। त्वं यज्ञोपवीतं, यस्मात् त्वं यज्ञस्य उपवीतं अतस्त्वया उपनीतो भवामि। ततः पुष्पमालां परिधाय पठेत्। ओं श्रीरसि मयि रमस्व। त्वं
श्रीः मां शोभितं कुरु। अनन्तरमाचार्य्यः ब्रूयात्। अधीतं वेदमधीष्व। अधीतान् वेदान् अध्ययनं कुरु। ततो ब्रह्मचारी पठितान् वेदान् पठेत्।
एवमाचार्य्यः ब्रह्मचारिणमुपदिशेत् ओं सत्यं वद। समूलो वा एष परिशुष्यति योऽनृतं वदति। सत्यवचनं कथय। यो मिथ्यां कथयति समू-
लेन सह परिशुष्को भवति। ओं धर्मं चर। धर्मात् परं नास्ति। धर्मः सर्वेषां मधु। धर्माचरणं कुरु धर्मात् परं (अन्यत) किमपि नास्ति सर्वे-
षामेव जन्तूनां धर्मः मधुस्वरूपः। ओं श्रद्धया देयं। अश्रद्धया अदेयं। श्रद्धया सह दद्यात् अश्रद्धया न दद्यात्। ओं मातृदेवो भव
पितृदेवो भव आचार्य्यदेवो भव। मातरं पितरं आचार्य्यञ्च दैवतत्वं जानीहि। ओं यान्यनवद्यानि कर्म्माणि तानि सेवितव्यानि नो-
तराणि। यावन्ति कर्म्माणि कल्याणकराणि तानि अनुष्ठेयानि, अकल्याणकराणि तु नानुष्ठेयानि ओं यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि
नेतराणि। वयं यानि सकलानि सदाचाराणि अनुतिष्ठामः, त्वं तत् समुच्चयं अनुतिष्ठ, तद्भिन्नस्यान्यस्य कर्मणोऽनुष्ठानं मा कुरु। शान्तिः शान्तिः
शान्तिः ओं हरिः ओं। अनन्तरं ब्रह्मचारी कर्म्मशेषं लक्ष्यीकृत्य आचार्य्यमभिवादयेत्। अमुकगोत्रः अमुकदेवशर्म्माऽहं भोः अभिवाद-
ये। आचार्य्यः पुष्पदानपूर्व्वकं शुभमस्तु इत्युक्त्वा आशीर्वादपूर्व्वकं च प्रत्यभिवादयेत्। ततः आचार्य्यः ब्रह्मचारी च उभौ उत्थाय प्रार्थये-

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

तां । ओं पिता नोऽसि । त्वमस्माकं पिता । ओं पिता नो बोधि । पिता इव अस्मान् ज्ञानं शिक्षय । ओं नमस्तेऽस्तु । वयं त्वां नमामः । मा मा हिंसीः
मोहितं पापाच्च मां त्रच, मां मा परित्यज. मां मा विनाशय । ओं विश्वानि देव सवितर्दुरितानि परासुव । हे देव हे पितः अस्माकं सर्वान्
पापान् परिमार्जय । ओं यद्भद्रं तन्न आसुव । यद् भद्रं यच्च कल्याणं तदस्माकमन्तरे शीघ्रं प्रेरय । ओं नमः शम्भवाय च मयोभवाय च
नमः शङ्कराय च मयस्कराय च नमः नमः शिवतमाय च । त्वं परमात्मा सुखकरः कल्याणकरश्च. अतः सुखकल्याणेताकर्त्रुं कल्याणानां कल्या-
णतरं त्वां नमामि । ततो ब्रह्मचारी ईश्वरं प्रणमेत् । ओं य एकोऽवर्णो बहुधा शक्तियोगात् वर्णाननेकान् निहितार्थो दधाति । विचैति चान्ते वि-
श्वमादौ स देवः स नो बुद्ध्या शुभया संयुनक्तु । यः एकः एवं वर्णहीनः अपि च प्रजानां प्रयोजनं विहितैव विचित्रानन्तशक्तियोगात् विविधानि
काम्यानि वस्तूनि विदधाति. निखिलोऽयं विश्वः आदौ मध्ये अन्ते च येन व्याप्तोऽस्ति, स दीप्यमानो जगदीश्वरः सोऽस्मान् शुभया बुद्ध्या
युनक्तु । ओं एकमेवाद्वितीयं । ततः पादयोः चर्मपादुकां प्रदाय पठेत् । नक्षत्रस्थो नयतु मां । यूयं नेतारः मां अभीष्टदेशं प्रापयन्तु । ततः स्वप्रमा-
णवैणवदण्डं गृहीत्वा पठेत् । ओं गन्धर्वो स्युपमामव । त्वं रक्षाकर्ता मां त्व । ततो गृहं गच्छेत् । इति समावर्तनं समाप्तं ॥

अथ दीक्षा । कृतोपनयनो मानव उपनयनान्तरं एकवर्षमध्ये ईश्वरं परकाले कर्तव्यकर्माणि च आचार्याद्दुपदिष्टो भवेत् । तत्र प्रथमं
आचार्येण अनुज्ञातो भूत्वा दीक्षाग्रहणं कुर्यात् । दिवसस्य प्रथमो भागो दीक्षाग्रहणाय प्रशस्तसमयः दीक्षार्थी यथासमयं काय-

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

मनोवाग्भिः पवित्रः सन् उपासनामण्डपे वेद्याः सम्मुखभागे उपविशेत् । तत आचार्य्यः साधारणब्रह्मोपासनां समाप्य ब्राह्मधर्म्मोद्धृतम्
पठेत् । ओं पुण्यं कुर्व्वन् पुण्यकीर्त्तिः पुण्यं स्थानं स्म गच्छति । पुण्यं प्राणान् धारयति पुण्यं प्राणदमुच्यते । मनुष्यः पुण्यं कर्म्म कृत्वा
पवित्रां कीर्त्तिं लभते पुण्यं लोकं गच्छति च, पुण्यं जीवानां प्राणान् धारयति, पुण्यं प्राणदातृ इति विख्यातमस्ति । ओं धर्म्मं शनैः सञ्चि-
नुयात् वल्मीकमिव पुत्तिका ॥ परलोकसहायार्थं सर्व्वभूतान्यपीडयन् । कथञ्चित्स्वल्पेनापि कञ्चित् प्राणिनमपीडयित्वा परलोकसाहाय्याय
यथा पुत्तिकाः वल्मीकं सञ्चिन्वन्ति तथा धर्म्मं शनैः शनैः सञ्चिनुयात् । ओं नामुत्र हि सहायार्थं पिता माता च तिष्ठतः । न पुत्र-
दारं न ज्ञातिर्धर्म्मस्तिष्ठति केवलः । परलोके सहायत्वाय पिता माता स्त्री पुत्रो ज्ञातिर्वर्बान्धवो वा न कोऽपि तिष्ठति । केवलो धर्म्म एव ।
ओं एकः प्रजायते जन्तुरेक एव प्रलीयते । एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् । एकाकी मनुष्यो जन्म गृह्णाति, एकाक्येव स्वपुण्यफलं प्राप्नोति एव-
मेकाक्येव स्वीय दुष्कृतिफलं भुङ्क्ते । ओं मृतं शरीरमुत्सृज्य काष्ठलोष्ठसमं क्षितौ । विमुखा बान्धवा यान्ति धर्म्मस्तमनुगच्छति । बान्धवाः पृथिव्यां
पतितं मृतशरीरं काष्ठलोष्ठवत् परित्यज्य विमुखा भूत्वा गच्छन्ति, धर्म्मस्तस्यानुगामी भवेत् । ततो व्याख्यानं । यथा । ओं स एतांश्चरतु
मृतान्स्ते भवन्ति । ईश्वरः आत्मनः प्राणः, स एव तस्य आलोकः, स एव तस्यामृतं । तस्याभावे आत्मा स्फूर्त्तिहीनो भूत्वा विषादसिन्धौ निमज्जति ।
तं दृष्ट्वैव आत्मा जीवति, एकमात्रं गतिं तं प्राप्यैव स निर्भयो भवति । स तस्य मङ्गलालोकद्वारैर्जगत्संसारं समुज्ज्वलं पश्यति । तस्य समीपे पृथि-
स यदा आत्मनि प्रकाशः स्यात् तदा स मधुतृप्तो भवति ।

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

वी नदी समुद्रश्चन्द्रः सूर्यश्च सर्वे मधुमया भवेयुः। तेनामृतेन सह योजयित्वा अमृतलाभाय सास्थिरो निश्चयो भवति। यः स्वे आत्मनि परमात्मा-
नं नापश्यत्, यश्चित्काल तस्माद्विच्छिन्न आस्ते, यस्तं प्रीत्या अपूजयित्वा, इच्छया तस्य कार्यमसमाप्य विकृतसेवायामेव च जीवनं यापयति तस्य
तद्जीवनं धिक्। तस्य दुर्गतेरन्तो नास्ति, स दुःखादुःखे दुर्भिक्षाद्दुर्भिक्षे पदं निक्षिपति। एवम्भूते दीने क्षीणे पशुवज्जीवने किम्प्रयोजनं। आ-
त्मनः चूर्णं मलिनञ्च हृदयमादायैव जीवनस्यावसानो भविष्यति? येतादृशानि पापतापदुःखशोकाः सन्ति, तेषां मध्ये स्थित्वा यदि तस्य पवित्र-
स्वरूपस्योपरि गाढ़विश्वासं कर्तुमशक्तो भवेयं तदा शान्तेरन्यं उपायं कुत्र लभेमहि। अस्मभ्यं सूर्यश्चन्द्रमाः नक्षत्राश्च एते आलोकं वर्षन्ति।
वायुरविरतं वहन्नस्माकं जीवनं रक्षति। वृष्टिरस्मभ्यं मेदिनीमुर्वरां कृत्वा अस्माकं शरीरं पुष्णाति। वयं कामैरजस्रं पतिवृताः स्म। एते समस्ता
भोगास्तावन्त एव किमस्माभिरुपार्जिताः? एतेषां मध्ये किमपि स्मृत्वा सर्वसुखदातारं कृतज्ञतामुपचरितुं न शक्ता वयं। यथेयं पृथिवी निःशब्देन
प्रदक्षिणीकृत्य आलोकं लभते वयमपि अचेतनाः सन्तः किं तेन प्रदत्तान् कामान् विषयान् सर्वान् उपभुञ्ज्महे? न वा अस्माकं कमलादुत्थाय
कृतज्ञताध्वनिः समस्तं जगत् पूरयिष्यति? य ईश्वरात् विच्छिन्नोऽस्ति स मृत्योरतीतां तां मृतसञ्जीवनीशक्तिं पुनर्हृदये अनुभवितुं समर्थो न स्यात्
स शरीरस्य चर्ममांसानि पश्यति, आन्तरस्यात्मानं तु न पश्यति। तस्य समीपे परलोको न प्रकाशते। स मोहान्धो भूत्वा मनसि निश्चिनोति
पृथिवीपर्यन्तमेव जीवनं; मृत्युः स्याच्चेत् तदा शेषः स्यात्। स पृथिव्यां कदाचित् पापस्य जयं परञ्जयं धर्मस्य च पराजयं दृष्ट्वा धर्माकृ-

Joint Project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

ईश्वरस्य अभयं न्यायं मनसि चिन्तयितुं स न समर्थः स्यात्। यत्र धर्मात्मनः समग्राणां दुःखानामवसानं भविष्यति, यत्र अन्यायात्याचारयोः शासनं भविष्यति एवम्भूतं स्थानं स न पश्यति। सुतरां यावती घटना तस्य समीपे प्रहेलिका इव भाति। मृत्योः समीपे कस्यापि विचारो नास्ति धनी दरिद्रः पापी पुण्यवान् इति। स सर्वानेवाक्रमिष्यति। अधुना यः सुवर्णपर्यङ्के शेते यो वीणावेणुमृदङ्गानां ध्वनिं श्रुत्वा मनसि निश्चिनोति, तस्य तत्सुखस्य विरतिः कदाचित् न भविष्यति; मृत्युरेकस्मिन् दिने तस्य सुखभूमेः शरीरात् सर्वाणि [illegible] दूरीकरिष्यति। स श्मशाने शवो भूत्वा पतित्वा च स्थास्यति। स यदा दर्पणे आत्मनः सुन्दरं मुखमपश्यत्, तदा मनसि नाचिन्तयत् यदिदं मुखं एकस्मिन् समये ज्योतिर्हीनः प्रभाहीनश्च भविष्यति। यदा यदि कदाचिन्मृत्युं स्मृत्वा आत्मानं पृच्छेत् किं मृत्युरेव आत्मनः शेषः? अथवा मृत्योः परमन्यत् किञ्चिदस्ति? आत्मनो मोहमेघाच्छन्नस्यात्मनः सकाशात् एतस्य न कश्चनोत्तरं प्राप्नुयात्। स दिनं दिनमपि वदति, मृत्योः परस्मिन् देशे किमस्ति, तथापि तस्य संवादमात्रेण कोऽपि तस्मै न वदति।। यदि कस्यचित् लोकस्य समीपे ज्ञातुं गच्छेत् तदा कश्चिद् वदति चान्द्रं लोकं गत्वा यावन्ति पुण्यफलानि भुक्त्वा पुनः पृथिव्यामागमिष्यति। कश्चिद् वदति स ईश्वरः पुण्यात्मनं अनन्तं स्वर्गं प्रदास्यति पापिनं अनन्तया नरकयातनया धक्ष्यति। एतेन तस्य भयं न निवर्त्तते। स कस्य वचनं ग्रहीष्यति? अस्माकमात्मनि यदि ईश्वरस्य आलोको न प्रकाशते यदि तेन ईश्वरेण सह मिलनं न कुर्मः तदा एनं संशयान्धकारं निवर्त्तयितुमक्षमा वयं। किन्तु यदा वयमीश्वरेण सह योगनिबन्धनं कुर्मः, यदा तस्य मङ्गलमयभावं हृदये प्रतिभातं भवेत् तदा संशयान्धकारं हृदयं नाच्छादयिष्यति। तदा आत्मना ज्ञातुं समर्थाः

Joint Project of the Rajarshi Sa... and the Yashwantrao Chavan Pratishthan, Mumbai.

ज्वलितोऽस्ति, स तेनैवालोकेन सर्व्वान् पश्यति । स स्वां परमार्तिं चरमार्तिं विलोक्य भयशून्यो भवति । यद्यपि यथा स्वल्पमनस उच्चारैः [illegible] स-
ञ्चरन्ति, स तथा शरीरेणापि ज्वरान्मुक्तो भूत्वा ईश्वरस्य समीपं गन्तुमभिलषति । ईश्वरस्य उज्ज्वलमुखमवलोक्य तस्य ज्ञानमुज्ज्वलं भवति । य आलोकस्तस्य हृदि
प्रज्वलति, स तेन मृत्योः परं पारं ज्योतिर्मयं ब्रह्मधाम पश्यति । ईश्वरं प्राप्य स सर्व्वान्धकारनिवर्त्तकं आलोकं प्राप्नोति । बहुश्रुतानि ~~[illegible]~~ ग्रन्थान-
धीत्य बहुश्रुतानामुपदेशं गृहीत्वा यो विश्वासो न जायते, सकृदीश्वरस्यालोकमवलोक्य अस्माकं स एव विश्वासः संजायते । तस्यामृतरसे सकृदास्वादिते-
बहुताश्रिकं गरलमपि ध्वस्तो भवति । ईश्वरेण सह योगे कृते वयं मुक्तेः पूर्व्वाभासं प्राप्स्यामः । य एकवारं परमात्मानमपश्यत्, स उत्फुल्लः सन् प्रतिदिनं
तमहमाधिक्येन द्रक्ष्यामि इत्याशयो तिष्ठति । तस्य समीपे सम्पदो विपदश्च समानाः प्रतिभान्ति, मृत्युरमृतस्य सोपानं भवति । यः परलोकं प्रति निःसं-
शयं बुभूषति, तमेतन्मात्रं उपदिशामि, यत् पवित्रेण हृदा ईश्वरस्य समीपं गच्छ, तस्य मङ्गलमयीं मूर्त्तिं पश्य, अवश्यमेव निःसंशयो भविष्यसि ।
"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः" । तस्मिन् ईश्वरे साक्षात् कृते हृदो ग्रन्थिरपसृतो भवति, यावन्तो संशया अपगच्छन्ति । वयं यदि पापेन कल-
ङ्किता भवेम, तथापि वयं निराशा न भविष्यामः । अस्मासु अनुतप्तहृदा तस्य शरणं गतेषु सत्सु सोऽस्मान् गृहीष्यति, तस्यैतादृग् इच्छा यद्वयं पापतापा-
भ्यां ~~नि~~ निष्कृतिं लभेम । वयं यदि स्वचेष्टयैव पापात् तापाच्च निष्कृतिं लब्धुं तस्य शरणं व्रजेम, तदा सा इच्छा यद्यपूर्णा भवेत् तदा का इच्छा पू-
र्णा भविष्यति । तस्य शरणं व्रजेषु अस्मासु सोऽस्मानभयं दत्वा कथयति "वत्सा भवन्तो मा बिभ्यतु अहं युष्मान् गृहीष्यामि" तस्याभयद्वारं गतेष्वस्मासु

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com